ते ते दिग्विदिगागताः सुकृतिनस्तास्ता
दिदृक्षार्थिनः ।
आरामश्च स एव नन्दनवनश्रीणां तिरस्कारिणः
सर्व्वाण्येव महाप्रभुं वत विना शून्यानि मन्यामहे ॥"
इति चैतन्यचन्द्रोदयनाटकम् ॥

महाप्रलयः, पुं, (महांश्चासौ प्रलयो जगतामवसानश्चेति ।) त्रिलोकनाशः । तत्पर्य्यायः । संहारः २ । इति हलायुधः ॥ तस्य विवरणं यथा,—
श्रीमार्कण्डेय उवाच ।
"मन्वन्तरं मनोः कालो यावत् पालयते प्रजाः ।
एको मनुः स कालस्तु मन्वन्तरमिति श्रुतम् ।
तदेकसप्ततियुगैर्द्देवानामिह जायते ।
तैश्चतुर्द्दशभिः कल्पो दिनमेकन्तु वेधसः ॥
दिनान्ते वेधसो जाते सुषुप्ता तस्य जायते ।
योगनिद्रा महामाया समायाति पितामहम् ॥
नाभिपद्मं प्रविश्याथ विष्णोरमिततेजसः ।
सुखं स शेते भगवान् ब्रह्मा लोकपितामहः ॥
ततो विष्णुः स्वयं भूत्वा रुद्ररूपी जनार्द्दनः ।
पूर्व्ववन्नाशयामास स सर्व्वं भुवनत्रयम् ॥
वायुना वह्निना सर्व्वं दाहयामास वै यथा ।
महाप्रलयकालेषु तथा सर्व्वं जगत्त्रयम् ॥
जनं यान्ति प्रतापार्त्ता महर्लोकनिवासिनः ।
त्रैलोक्यं दाहयामास पीड़िता दारुणाग्निना ॥
ततः कालान्तकैर्म्मेघैर्नानावर्णैर्महास्वनैः ।
समुत्पाद्य महावृष्टिमापूर्य्य भुवनत्रयम् ॥
चलत्तरङ्गैस्तोयौघैराधुतस्थानसङ्गतैः ।
निधाय जठरे लोकानिमांस्त्रीन् स जनार्द्दनः ॥
नागपर्य्यङ्कशयने शेते स परमेश्वरः ।
शयानं नाभिकमले ब्रह्माणं स जगत्प्रभुः ॥
संस्थाप्य त्रीनिमाल्लोकान् दग्ध्वा दग्ध्वा श्रिया
सह ।
शेते स भोगिशय्यायां ब्रह्मा नारायणात्मकः ॥
योगनिद्रावशं यातस्त्रैलोक्यग्रासबृंहितः ॥
त्रैलोक्यमखिलं दग्धं यदा कालाग्निना तदा ।
अनन्तः पृथिवीं त्यक्त्वा विष्णोरन्तिकमागतः ॥
तेन त्यक्ता तु पृथिवी चरमाधादधो गता ।
पतिता कूर्म्मपृष्ठे तु विशीर्णेव तदाभवत् ॥
कूर्म्मोऽपि महतो यत्नाच्चलन्तीं पृथिवीं जले ।
वक्षाखण्डं पङ्क्तिराक्रम्य पृष्ठे दध्रे धरां तदा ॥
नखाखण्डसंयोगाच्चूर्णिता पृथिवी भवेत् ।
इति तां परिजग्राह कूर्म्मरूपी जनार्द्दनः ॥
चलज्जलौघसंसर्गाच्चलन्त्या धरया तदा ।
कूर्म्मपृष्ठं बहुतरैर्व्रणैर्विततीकृतम् ॥
अनन्तस्तत्र गत्वा तु यत्र क्षीरोदसागरः ।
तत्र शयं श्रिया युक्तं सुषुप्सन्तं जनार्द्दनम् ॥
फणदं प्रथमं दधे त्रैलोक्यग्रासबृंहितम् ।
पूर्व्वं फणं वितत्योर्द्ध्वं पद्मं कृत्वा महाबलः ।
विष्णुमाच्छादयामास शेषाख्यः परमेश्वरः ॥
तस्योपधानमकरोदनन्तो दक्षिणां फणाम् ।
उत्तरां पादयोश्चक्रे उपाधानं महाबलः ॥
तालवृन्तं तदा चक्रे स शेषः पश्चिमां फणाम् ।
स्वयन्तु वीजयामास शेषरूपी जनार्द्दनम् ॥
शङ्खं चक्रं नन्दकासिमिषुधी द्वे महाबलः ।
ऐशानयाथ फणया स दध्रे गरुड़ं तदा ॥
गदां पद्मञ्च शार्ङ्गञ्च तथैव विविधायुधम् ।
यानि चान्यानि तस्यासन्नाग्नेय्या फणया दधौ ॥
एवं कृत्वा स्वकं कार्य्यं शयनीयं तदा हरेः ।
पृथ्वीमधरकायेन मध्यामाक्रम्य चाम्भसि ॥
त्रैलोक्यग्रासबृंहितं सलक्ष्मीकं जनार्द्दनम् ।
सोपासङ्गजगद्बीजं जगत्कारणकारणम् ॥
नित्यानन्दं वेदमयं ब्रह्मण्यं परमेश्वरम् ।
जगत्कारणकर्त्तारं जगत्कारणकारणम् ॥
भूतभव्यभवन्नाथं परापरपतिं हरिम् ।
दधार शिरसानन्तः स्वयमेव स्वकां तनूम् ॥
एवं ब्रह्मदिनस्यैव प्रमाणेन निशां हरिः ।
सन्ध्याञ्च समधिप्राप्य शेते नारायणोऽव्ययः ॥
यस्मादयन्तु प्रलयो ब्रह्मणः स्याद्दिने दिने ।
तस्माद्दैनन्दिनमिति ख्यापयन्ति पुराविदः ॥
व्यतीतायां निशायान्तु ब्रह्मा लोकपितामहः ।
त्यक्त्वा निद्रां समुत्तस्थौ स पुनः सृष्टये त्विह ॥"
इति कालिकापुराणे २७ अध्यायः ॥
न्यायमते जन्यभावानधिकरणकालः । स च चरमध्वंसरूपः ॥

महाप्रसादः, पुं, (महांश्चासौ प्रसादश्चेति ।) विष्णुनैवेद्यादिः । यथा,—
"पादोदकञ्च निर्म्माल्यं नैवेद्यञ्च विशेषतः ।
महाप्रसाद इत्युक्त्वा ग्राह्यं विष्णोः प्रयत्नतः ॥"
इत्येकादशीतत्त्वधृतमत्स्यसूक्तवचनम् ॥
श्रीजगन्नाथस्य महाप्रसादमाहात्म्यं जगन्नाथशब्दे द्रष्टव्यम् ॥ अतिशयप्रसन्नता च ॥ (महान् प्रसादोऽस्य । शिवः । यथा, महाभारते ।१३। १७ । १२६ ।
"महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ॥")

महाप्रस्थानगमनं, क्ली, (प्रस्थीयते अस्मिन्निति । प्र+स्था+ल्युट् । महत् प्रस्थानं महापथः । तत्र गमनम् ।) महापथगमनम् । तत्तु मरणोद्देशेन हिमालयपर्य्यन्तप्रयाणम् । तच्च कलौ निषिद्धम् । यथा, बृहन्नारदीये ।
"समुद्रयात्रास्वीकारः कमण्डलुविधारणम् ।
द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥
देवरेण सुतोत्पत्तिर्म्मधुपर्के पशोर्व्वधः ।
मांसादनं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ॥
दत्तायाश्चैव कन्यायाः पुनर्द्दानं वरस्य च ।
दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकौ ॥
महाप्रस्थानगमनं गोमेधञ्च तथा मखम् ।
इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्म्मनीषिणः ॥"
इत्युद्वाहतत्त्वम् ॥

महाप्राणः, पुं, (महान्तो दीर्घकालस्थायिनः प्राणा यस्य सः ।) द्रोणकाकः । इति राजनिर्घण्टः ॥ वर्णविशेषः । स च । ख घ छ झ ठ ढ थ ध फ भ श ष स ह रूपः । यथा,—
"वर्गाणां प्रथमतृतीयपञ्चमाः प्रथमतृतीययमौ य र ल वाश्चाल्पप्राणाः । अन्ये महाप्राणा इत्यर्थः ।" इति सिद्धान्तकौमुदी ॥ (महाबले, त्रि । यथा, श्रीमद्भागवते । ६ । ११ । ६ ।
"एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून् ।
व्यनदत् सुमहाप्राणो येन लोका विचेतसः ॥")

महाफलः, पुं, (महत् पूजादौ प्रशस्तं पूज्यं वा फलमस्य ।) विल्ववृक्षः । इति रत्नमाला ॥ (महच्च तत् फलञ्चेति ।) बृहत्फले, क्ली ॥ (यथा, मनौ । ३ । १२८ ।
"श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः ।
अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् ॥")

महाफला, स्त्री, (महत् फलं आरोग्यादिकं यस्याः ।) इन्द्रवारुणी । इति जटाधरः ॥ (अस्याः पर्य्यायो भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी ।
वारुणी च पराप्युक्ता सा विशाला महाफला ॥
श्वेतपुष्पा मृगाक्षी च मृगेर्व्वारुर्मृगादनी ॥"
राजजम्बूः । तत्पर्य्यायो यथा, तत्रैव ।
"फलेन्द्राकथितानन्दो राजजम्बूर्महाफला ॥"
कटुतुम्बी । तत्पर्य्यायो यथा, तत्रैव ।
"इक्ष्वाकुः कटुतुम्बी स्यात् सा तुम्बी च महाफला ॥"
महाकोशातकी । तत्पर्य्यायो यथा, तत्रैव ।
"महाकोशातकी प्रोक्ता हस्तिघोषा महाफला ।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः ॥")

महाफेणा, स्त्री, (महती फेणा ।) हिण्डीरः । इति शब्दचन्द्रिका ॥

महाबलं, क्ली, (महदतिशयितं बलं सामर्थ्यमस्मात् । महत् बलमस्येति वा ।) सीसकम् । इति हेमचन्द्रः ॥ (तथास्य पर्य्यायः ।
"नागं महाबलं चीनं पिष्टं योगेष्टसीसकम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

महाबलः, पुं, (महदुत्कृष्टं बलं ऐश्वर्य्यं यस्य ।) बुद्धः । इति त्रिकाण्डशेषः ॥ (पितृगणविशेषः । यथा, मार्कण्डेये । ६६ । ४६ ।
"महान् महात्मा महितो महिमावान् महाबलः ।
गणाः पञ्च तथैवैते पितॄणां पापनाशनाः ॥")
वायुः । बलीयसि, त्रि । इति हेमचन्द्रः । ४ । १७३ ॥ (यथा, रामायणे । १ । १ । ३४ ।
"नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः ।
स जगाम वनं वीरो रामपादप्रसादकः ॥")

महाबला, स्त्री, (महद्बलमस्याः ।) बलाभेदः । पीतवाट्यालकः । तत्पर्य्यायः । ऋष्यप्रोक्ता २ अतिबला ३ पीतपुष्पी ४ । इति रत्नमाला ॥ (अस्याः पर्य्यायो यथा,—
"वाट्या वाट्यालिका वाट्या सैव वाट्यालकापि च ।
महाबला पीतपुष्पा सहदेवी च सा स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)